सुधागमनजन्यं । स्त्रियास्तु पुत्रपितृश्वशुरगमनजन्यं । इति प्रायश्चित्तविवेकः ॥

अतिबलः, त्रि, (अतिशयितं बलं यस्य सः बहुव्रीहिः।) प्रबलः । अतिशयबलवान् । प्रकृष्टबलविशिष्टः । इति मेदिनी ॥ (विजृम्भमाणोऽतिबलः प्रत्यबुध्यत राक्षसः ॥ इति रामायणम्) ॥

अतिबला, स्त्री, (अत्यन्तं बलं यस्याः सा बहुव्रीहिः।) विश्वामित्रेण रामाय दत्ते अस्त्रविद्याविशेषे यथा,—

"गृहाण द्वे इमे विद्ये बलामतिबलां तथा"।

इत्यादि रामायणे।) पीतबला। पीतवर्णबाड़ियाला इति ख्याता । पिटारणी । इति मदनविनोदः ॥ गुरुशकरीभेदः । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । बलिका २ बल्या ३ विकङ्कता ४ वाट्यपुष्पिका ५ घण्टा ६ शीता ७ शीतपुष्पा ८ भूरिचला ९ वृष्यगन्धिका १० । तस्या गुणाः । तिक्तत्वं । कटुत्वं । वातक्रमिनाशित्वं । दाहतृष्णाविषच्छर्द्दिक्लेदोपशमकारित्वञ्च । इति राजनिर्घण्टः ॥

अतिभारगः, पुं, (अतिभारेण वेगेन गच्छति अतिभार+गम्+कर्त्तरि ड, उपपदसमासः।) (खरः । अश्वतरः । गर्द्दभात् वड़वाजातः अश्वभेदः।) खेसरः । खचर इति भाषा । इति राजनिर्घण्टः ॥

अतिभीः, पुं, (अतिबिभेत्यस्याः अति भी+अपादाने क्विप् ।) वज्रज्वाला । इति हलायुधः ॥

अतिभूमिः, स्त्री, (अतिशयिता भूमिर्म्मर्य्यादा कर्म्मधारयः,अतिमर्य्यादा।) आधिक्यं ।यथा। प्राप्य मन्मथमदादतिभूमिं दुःसहस्तनभराः सुरतस्येति माघः ॥ अतिशयितभूमिः ॥

अतिमङ्गल्यः, पुं, (अतिमङ्गलाय हितः अतिमङ्गल+यत्।) बिल्ववृक्षः । इति रत्नमाला ॥ अतिशयमङ्गलजनके त्रि ॥

अतिमर्य्यादः, त्रि, (मर्य्यादामतिक्रान्तः प्रादिसमासः।) अतिशयितः । इति हेमचन्द्रः ॥ अतिशये क्ली ॥

अतिमात्रं, क्ली, (मात्रामल्पमतिक्रान्तं प्रादिसमासः।) अतिशयः । तद्युक्ते त्रि । इत्यमरः ॥ (यथा शाकुन्तले । अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात् ॥)

अतिमुक्तः, (पुं) माधवीलता । इत्यमरः ॥ तिनिशवृक्षः । इति हेमचन्द्रः ॥

अतिमुक्तः, त्रि, (अतिशयेन मुक्तः निर्व्वाणमुक्तिं गतः अति+मुच्+कर्त्तरि क्तः, निर्व्वाणमुक्तिविशिष्टः।) निष्फलः । निःसङ्गः । इति विश्वमेदिन्यौ ॥ प्राप्तनिर्व्वाणः ॥

अतिमुक्तकः, पुं, (मुच्+भावे क्त, अतिशयेन मुक्तं बन्धशैथिल्यं यस्य सः बहुव्रीहिः, कप् ।) तिनिशवृक्षः। इत्यमरः ॥ तिन्दुकवृक्षः । पुष्पवृक्षविशेषः। तत्पर्य्यायः । पुण्ड्रकः २ मल्लिनी ३ भ्रमरानन्दा ४ कामुककान्ता ५ । तस्य गुणाः । कषायत्वं । शीतलत्वं । श्रमनाशित्वं । पित्तदाहज्वरोन्मादहिक्काच्छर्द्दिनिवारकत्वञ्च । इति राजनिर्घण्टः ॥ (कर्णिकारान् कुरुवकान् चम्पकानतिमुक्तकान् ॥ इति रामायणे) ॥

अतिमोदा, स्त्री, (अत्यन्तो मोदो गन्धो यस्याः सा।) नवमल्लिका । इति राजनिर्घण्टः ॥

अतिरसा, स्त्री, (अत्यन्तो रसो यस्याः सा।) मूर्व्वालता । रास्ना । क्लीतनकं । इति राजनिर्घण्टः ॥

अतिरिक्तः, त्रि, (अति रिच्+कर्त्तरि क्तः। श्रेष्ठे भिन्ने शून्ये च । भावे क्तः, अतिरेके आधिक्ये च।) अधिकः। अतिशयितः । तत्पर्य्यायः । समधिकः २ । इत्यमरः ॥

अतिरेकः, त्रि, (अति रिच्+भावे घञ्। आधिक्ये श्रेष्ठत्वे च।) अतिशयः । यथा,—

"सम्पूर्णे तूभयोर्न्नैयमतिरेके परेऽहनि"।

इति तिथ्यादितत्त्वं ॥

अतिरोगः, पुं, (अत्यन्तोरोगः व्याधिः अति रुज्+भावे घञ् ।) क्षयव्याधिः । इति राजनिर्घण्टः ॥

अतिरोमशः, पुं, (अतिशयितं रोम तदेव विद्यतेऽस्य अतिरोमन्+मत्वर्थे श) वनच्छागलः । इति हारावली ॥ वृहत्वानर इति केचित् ॥ अतिशयलोमयुक्ते त्रि ॥

अतिलोमशा, स्त्री, (अतिशयितं लोम अतिलोमन्+मत्वर्थे श, स्त्रियां टाप् ।) नीलबुह्ना । इति रत्नमाला ॥

अतिवर्त्तुलः, पुं, (अतिशयितो वर्त्तुलः कर्म्मधारयः।) कलायविशेषः। बाँटुला कड़ाइ इति भाषा। इति रत्नमाला ॥ अस्य गुणाः सतीलशब्दे द्रष्टव्याः ॥

अतिवादः, पुं, (अति+वद्+भावे घञ्।) अभिवादः । परुषोक्तिः । इत्यमरटीकायां रमानाथः ॥ ("अतिवादांस्तितिक्षेत नावमन्येत कञ्चनः।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥ मनुः।)

अतिविकटः, पुं, (अतिशयितो विकटः भीषणः) दुष्टहस्ती। इति शब्दमाला ॥ अतिकराले त्रि ॥

अतिविषा, स्त्री, (विषमतिक्रान्ता प्रादिसमासः । वा विषमतिक्रान्तं यया बहुव्रीहिः।) वृक्षविशेषः । आतइच । आतैच इति भाषा। तत्पर्य्यायः । विश्वा २ विषा ३ प्रतिविषा ४ उपविषा ५ अरुणा ६ शृङ्गी ७ महौषधं ८ । इत्यमरः ॥ काश्मीरा ९ श्वेता १० । इति रत्नमाला ॥ श्वेतकन्दा ११ भृङ्गी १२ भङ्गुरा १३ विरूपा १४ श्यामकन्दा १५ विषरूपा १६ वीरा १७ माद्री १८ श्वेतवचा १९ अम्बता २० । इति राजनिर्घण्टः ॥ तस्या गुणाः । पाचकत्वं । ग्राहित्वं । दोषनाशित्वञ्च । इति राजवल्लभः ॥ कटुत्वं । कफपित्तज्वरामातिसारकासविषच्छर्द्दिनाशित्वञ्च ।

"त्रिविधातिविषा ज्ञेया शुक्ला कृष्णा तथारुणा ।
रसवीर्य्यविपाकेषु निर्व्विशेव गुणाधिका" ॥

इति राजनिर्घण्टः ॥

"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन्" ॥

इति भावप्रकाशः ॥

अतिविस्रब्धनवोढ़ा, स्त्री, (अतिविस्रब्धा अतिप्रश्रययुक्ता नवोढ़ा प्रणयिनी नायिका इति यावत् कर्म्मधारयः।) स्वीयान्तर्गतमध्यनायिकाभेदः।तस्याः लक्षणं । नायकातिशयप्रश्रययुक्ता । अस्याश्चेष्टा । सधैर्य्यसापराधनायके वक्रोक्तिः । अधैर्य्यसापराधनायके परुषवाक् । इति रसमञ्जरी ॥

अतिवृष्टिः, स्त्री, (अतिशयेन वृष्टिः वर्षणं।) अतिशयवृष्टिः । ईतिविशेषः । स तु महद्वर्षणरूपः शस्यानामुत्पातः । यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षड़ेता ईतयः स्मृताः ॥

इति पराशरः ॥

अतिवेलं, क्ली, (वेलां मर्य्यादां कूलं वा अतिक्रान्तं प्रादिसमासः, ह्रस्वः।) अतिशयिते त्रि। इत्यमरः॥ (जलमतिवेलं पयोराशेः ॥ नीतिमाला)।

अतिव्यथा, स्त्री, (अत्यन्ता व्यथायातना कर्म्मधारयः । व्यथ+भावे अङ् स्त्रियां टाप्।) अतिशययातना। तीव्रवेदना । इति शब्दरत्नावली ॥

अतिव्याप्तिः, स्त्री, (अतिशयेन व्याप्तिर्व्यापनं।) अतिशयव्यापनं । अलक्ष्ये लक्षणस्य गमनं । यथा साध्याभाववदवृत्तित्वमिति व्याप्तिलक्षणे धूमवान् वह्नेरित्यत्र धूमाभावाधिकरणह्रदवृत्तित्वाभावमादाय अतिव्याप्तिः । इति तार्किकाः ॥ स्वाव्यवहितप्राक्क्षणावच्छेदेन रविभुज्यमानराशीयरविसंयोगविशिष्टस्वान्तिमक्षणकत्वं मलमासत्वं भानुलङ्घिते अतिव्याप्तिवारणाय औत्पातिकभिन्नत्वेन विशेषणीयं । इति मलमासतत्त्वटीका ॥ मुख्यफलजनकव्यापारजनकत्वे सति मुख्यफलाजनकत्वं अङ्गत्वं घटादावतिव्याप्तिवारणाय सत्यन्तं इति तिथ्यादितत्त्वटीका च ॥

अतिशक्तिता, स्त्री, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं यस्य बहुव्रीहिः, तस्य भावः तल् स्त्रियां टाप्) विक्रमः । महाबलं । इत्यमरः ॥

अतिशक्तिभाक्[ज्] पुं, (अतिशयिता शक्तिः कर्म्म साधनसामर्थ्यं कर्म्मधारयः। तां भजते अतिशक्ति+भज्+कर्त्तरि ण्विः, उपपदसमासः।) अतिशयशक्तिविशिष्टः।अतिसमर्थः।सवीर्य्यमतिशक्तिभाक् । इत्यमरः ॥

अतिशयः, पुं, (अति+शी+अच्) अधिकः । तत्पर्य्यायः । भरः २ अतिवेलं ३ भृशं ४ अत्यर्थं ५ अतिमात्रं ६ उद्गाढ़ं ७ निर्भरं ८ तीव्रं ९ एकान्तं १० नितान्तं ११ गाढ़ं १२ वाढ़ं १३ दृढ़ं १४ । इत्यमरः ॥ अतिमर्य्यादः १५ उत्कर्षः १६ । इति हेमचन्द्रः ॥ बलवत् १७ सुष्ठु १८ किमुत १९ सु २० अतीव २१ अति २२ । इत्यव्ययवर्गे अमरः ॥ अतिरिक्तः २३ समधिकः २४ । इति विशेष्यनिघ्नवर्गे अमरः ॥

अतिशयनं, क्ली, (अति+शी+भावे ल्युट्) अतिशयः । तद्युक्ते त्रि । इत्यमरटीकायां रमानाथः। (शयनमतिक्रान्तं अत्यादीतिसमासः । अतिक्रान्तशयनम्।)

अतिशायनं, क्ली, (अति शी+स्वार्थे णिच् भावे